चौखम्बा स्तोत्र ग्रन्थमाला

१३

शनैश्चरसहस्रनामस्तोत्रम्

(नामावलीसहितम्)

चौखम्बा संस्कृत प्रतिष्ठान : दिल्ली

मूल्य १०.००

॥ श्रीरस्तु ॥

॥ शनैश्चरसहस्रनामस्तोत्रम् ॥

अष्टोत्तरनामावळिसंवलितम्



चौखम्बा संस्कृत प्रतिष्ठान

३८ यू. ए., बंगलो रोड, जवाहरनगर

दिल्ली ११०००७

मूल्य १०.००

॥ श्रीरस्तु ॥

॥ शनैश्चरसहस्रनामस्तोत्रम् ॥



अस्य श्रीशनैश्चरसहस्रनामस्तोत्र महामन्त्रस्य । काश्यपऋषिः । अनुष्टुप्छन्दः ॥ शनैश्चरो देवता । शम् बीजम् ॥ नम् शक्तिः ॥ मम् कीलकम् ॥ शनैश्चरप्रसादासिद्ध्यर्थे जपे विनियोगः ॥ शनैश्चराय अङ्गुष्ठाभ्यां नमः ॥ मन्दगतये तर्जनीभ्यां नमः ॥ अधोक्षजाय मध्यमाभ्यां नमः ॥ सौरये अनामिकाभ्यां नमः ॥ शुष्कोदराय कनिष्ठिकाभ्यां नमः ॥ छायात्मजाय करतलकरपृष्ठाभ्यां नमः ॥ शनैश्चराय हृदयाय नमः ॥ मन्दगतये शिरसे स्वाहा ॥ अधोक्षजाय शिखायै

वषट् ॥ सौरये कवचाय हुम् । शुष्कोदराय नेत्रत्रयाय वौषट् ॥
छायात्मजाय अस्त्राय फट् ॥ भूर्भुवस्सुवरोमिति दिग्बन्धः ॥

ध्यानम् ॥ चापासनो गृध्रधरस्तु नीलः प्रत्यङ्मुखः काश्यप-
गोत्रजातः । सशूलचापेषु गदाधरोऽव्यात् सौराष्ट्रदेशप्रभवश्च शौरिः ॥
नीलाम्बरो नीलवपुः किरीटी गृध्रासनस्थो विकृताननश्च । केयूरहारादि-
विभूषिताङ्ग स्सदाऽस्तु मे मन्दगतिः प्रसन्नः ॥

ओम् ॥ अमिताभाष्यघहरः अशेषदुरितापहः ।
अघोररूपोऽतिदीर्घकायोऽशेषभयानकः ॥ १

अनन्तो अन्नदाता चाश्वत्थमूलजपे प्रियः ।
अतिसम्पत्प्रदोऽमोघः अन्यस्तुत्या प्रकोपितः ॥ २
अपराजितो अद्वितीयः अतितेजोऽभयप्रदः ।
अष्टमस्थोऽञ्जननिभः अखिलात्मार्कनन्दनः ॥ ३
अतिदारुण अक्षोभ्यः अप्सरोभिः प्रपूजितः ।
अभीष्टफलदोऽरिष्टमथनोऽमरपूजितः ॥ ४
अनुग्राह्यो अप्रमेय पराक्रम विभीषणः ।
असाध्ययोगो अखिल दोषघ्नः अपराकृतः ॥ ५
अप्रमेयोऽतिसुखदः अमराधिपपूजितः ।

अवलोकात् सर्वनाशः अश्वत्थाम द्वियायुधः ॥ ६

अपराधसहिष्णुश्च अश्वत्थाम सुपूजितः ।
अनन्तपुण्यफलदो अतृप्तोतिबलोपिच ॥ ७
अवलोकात् सर्ववन्द्यः अक्षीणकरुणानिधिः ।
अविद्यामूलनाशश्च अक्षय्यफलदायकः ॥ ८
आनन्दपरिपूर्णश्च आयुष्कारक एवच ।
आश्रितेष्टार्थवरदः आधिव्याधिहरोपिच । ९
अनन्दमय आनन्दकरो आयुधधारकः ॥
आत्मचक्राधिकारी च आत्मस्तुत्यपरायणः ॥ १०
आयुष्करो आनुपूर्व्यः आतायत्तजगत्त्रयः ।

आत्मनामजपप्रीतः आत्माधिकफलप्रदः ॥ ११
आदित्यसंभवो आर्तिभञ्जनो आत्मरक्षकः ।
आपद्बान्धव आनन्दरूपो आयुःप्रदोपिच ॥ १२
आकर्णपूर्णचापश्च आत्मोद्दिष्ट द्विजप्रदः ।
आनुकूल्यो आत्मरूप प्रतिमादान सुप्रियः ॥ १३
आत्मारामो आदिदेवो आपन्नार्ति विनाशनः ।
इन्दिरार्चितपादश्च इन्द्रभोगफलप्रदः ॥ १४
इन्द्रदेवस्वरूपश्च इष्टेष्टवरदायकः ।
इष्टापूर्तिप्रदो इन्दुमनीष्टवरदायकः ॥ १५

इन्दिरारमणः प्रीतः इन्द्रवंशनृपार्चितः

इहामुत्रेष्टफलदः इन्दिरारमणार्चितः ॥ १६
ईंद्रियो ईश्वरप्रीतः ईषणात्रयवर्जितः ।
उमास्वरूपउद्बोध्यः उशना उत्सवप्रियः ॥ १७
उमादेव्यर्चनप्रीतः उच्चस्थोच्चफलप्रदः ।
उरुप्रकाशो उच्चस्थ योगदः उरुपराक्रमः ॥ १८
ऊर्ध्वलोकादिसञ्चारी ऊर्ध्वलोकादिनायकः ।
ऊर्जस्वी ऊनपादश्च ऋकाराक्षरपूजितः ॥ १९
ऋषिप्रोक्त पुराणज्ञः ऋषिभिः परिपूजितः ।
ऋग्वेदवन्द्यो ऋग्रूपी ऋजुमार्ग प्रवर्तकः ॥ २०

ऌुलितोद्धारको ऌूत भवपाशप्रभञ्जनः ।
ऌूकाररूपकोलब्धधर्ममार्गप्रवर्तकः ॥ २१

ऐकाधिपत्यसाम्राज्यप्रदो एनौघनाशनः ।
एकपाद्येक ऐकोनविंशतिमासभुक्तिदः ॥ २२

एकोनविंशतिवर्षदशो एणाङ्कपूजितः ।
ऐश्वर्यफलदो ऐन्द्र ऐरावतसुपूजितः ॥ २३

ओंकार जपसुप्रीतः ओंकार परिपूजितः ।
ओंकारबीजो औदार्य हस्तो औन्नत्यदायकः ॥ २४

औदार्यगुण औदार्य शीलो औपम्यकारकः ।

करपङ्कजसन्नद्धधनुश्च करुणानिधिः ॥ २५

कालः कठिनचित्तश्च कालमेघसमप्रभः ।
किरीठी कर्मकृत्कारयिताकालसहोदरः ॥ २६
कालाम्बरः काकवाहः कर्मठः काश्यपान्वयः ।
कालचक्रप्रभेदी च कालरूपी च कारणः ॥ २७
कारिमूर्तिः कालभर्ता किरीटमकुटोज्ज्वलः ।
कार्यकारण कालज्ञः काञ्चनाभरथान्वितः ॥ २८
कालदंष्ट्रः क्रोधरूपः कराळी कृष्णकेतनः ।
कालात्मा कालकर्ता च कृतान्तः कृष्णगोप्रियः ॥ २९
कालाग्निरुद्ररूपश्च काश्यपात्मजसंभवः ।

कृष्णवर्णहयश्चैव कृष्णगोक्षीरसुप्रियः ॥ ३०

कृष्णगोघृतसुप्रीतः कृष्णगोदधिसुप्रियः ।

कृष्णगावैकचित्तश्च कृष्णगोदानसुप्रियः ॥ ३१

कृष्णगोदत्तहृदयः कृष्णगोरक्षणप्रियः ।

कृष्णगोग्रासचित्तस्य सर्वपीडानिवारकः ॥ ३२

कृष्णगोदान शान्तस्य सर्वशान्त फलप्रदः ।

कृष्ण.गो.स्नान कामस्य गङ्गास्नान फलप्रदः ॥ ३३

कृष्णगोरक्षणस्याशु सर्वाभीष्टफलप्रदः ।

कृष्णगावप्रियश्चैव कपिला:पशुषु प्रियः ॥ ३४

कपिलाक्षीरपानस्य सोमपानफलप्रदः ।

कपिलादानसुप्रीतः कपिलाज्यहुतप्रियः ॥ ३५
कृष्णश्च कृत्तिकान्तस्थः कृष्णगोवत्ससुप्रियः ।
कृष्णमाल्यांबरधरः कृष्णःवर्णतनूरुहः ॥ ३६
कृष्णकेतुः कृशकृष्णदेहः कृष्णांबरप्रियः ।
क्रूरचेष्टः क्रूरभाव क्रूरदंष्ट्रः कुरूपि च ॥ ३७
कमलापति संसेव्यः कमलोद्भवपूजितः ।
कामितार्थप्रदः कामधेनु पूजनसुप्रियः ॥ ३८
कामधेनुसमाराध्यः कृपायुष विवर्धनः ।
कामधेन्वैकचित्तश्च कृपराज सुपूजितः ॥ ३९

कामदोग्धा च क्रुद्धश्च कुरुवंशसुपूजितः ।
कृष्णाङ्गमहिषीदोग्धा कृष्णेन कृतपूजनः ॥ ४०
कृष्णाङ्गमहिषीदानप्रियः कोणस्थ एवच ।
कृष्णाङ्गमहिषीदानलोलुपः कामपूजितः ॥ ४१
क्रूरावलोकनात्सर्वनाशः कृष्णाङ्गदप्रियः ।
खद्योतः खण्डनः खड्गधरः खेचरपूजितः ॥ ४२
खरांशुतनयश्चैव खगानां पतिवाहनः ।
गोसवासक्तहृदयः गोचरस्थानदोषहृत् ॥ ४३
गृहराश्याधिपश्चैव गृहराज महाबलः ।
गृध्रवाहो गृहपतिः गोचरो गानलोलुपः ॥ ४४

घोरो घर्मो घनतमो घर्मी घनकृपान्वितः ।
घननीलाम्बरधरो ङादिवर्ण सुसंज्ञितः ॥ ४५
चक्रवर्तिसमाराध्यः चन्द्रमत्या समर्चितः ।
चन्द्रमत्यार्तिहारी च चराचर सुखप्रदः ॥ ४६
चतुर्भुजश्चापहस्तः चराचरहितप्रदः ।
छायापुत्रः छत्रधरः छायादेवीसुतस्तथा ॥ ४७
जयप्रदो जगन्नीलो जपतां सर्वसिद्धिदः ।
जपविध्वस्तविमुखो जंभारिपरिपूजितः । ४८
जंभारिवन्द्यो जयदो जगज्जनमनोहरः ।

जगत्त्रयप्रकुपितो जगत्त्राणपरायणः ॥ ४९
जयो जयप्रदश्चैव जगदानन्दकारकः ।
ज्योतिश्च ज्योतिषां श्रेष्ठो ज्योतिश्शास्त्र प्रवर्तकः ॥ ५०
झर्झरीकृतदेहश्च झल्लरीवाद्यसुप्रियः ।
ज्ञानमूर्तिर्ज्ञानगम्यो ज्ञानी ज्ञानमहानिधिः ॥ ५१
ज्ञानप्रबोधकश्चैव ज्ञानदृष्ट्यावलोकितः ।
टङ्किताखिललोकश्च टङ्कितैन स्तमोरविः ॥ ५२
टङ्कारकारकश्चैव टिङ्कृतो टाम्भदप्रियः ।
ठकारमय सर्वस्वः ठकारकृतपूजितः ॥ ५३

ढक्कावाद्यप्रीतिकरः डमड्डुमरुकाप्रियः ।

डम्भरप्रभवो डम्भः डक्कानादप्रियङ्करः ॥ ५४
डाकिनी शाकिनी भूत सर्वोपद्रवकारकः ।
डाकिनीशाकिनीभूत सर्वोपद्रवनाशकः ॥ ५५
ढकाररूपो डाम्भीको णकारजपसुप्रियः ।
णकारमयमन्त्रार्थः णकारैकशिरोमणिः ॥ ५६
णकारवचनानन्दः णकारकरुणामयः ।
णकारस्य सर्वस्वः णकारैकपरायणः ॥ ५७
तर्जनीधृतमुद्रश्च तपसां फलदायकः ।
त्रिविक्रमनुतश्चैव त्रयीमयवपुर्धरः ॥ ५८

तपस्वी तपसा दग्धदेहः ताम्राधरस्तथा ।
त्रिकालवेदितव्यश्च त्रिकालमतितोषितः ॥ ५९

तुलोच्चयः त्रासकरः तिलतैलप्रियस्तथा ।
तैलान्न सन्तुष्टमनाः तिलदानप्रियस्तथाः ॥ ६०

तिलभक्ष्यप्रियश्चैव तिलचूर्णप्रियस्तथा ।
तिलखण्डप्रियश्चैव तिलापूपप्रियस्तथा ॥ ६१

तिलहोमप्रियश्चैव तापत्रयनिवारकः ।
तिलतर्पणसन्तुष्टः तिलतैलान्नतोषितः ॥ ६२

तिलैकदत्तहृदयः तेजस्वी तेजसान्निधिः ।
तेजसादित्यसङ्काशः तेजोमय वपुर्धरः ॥ ६३

तत्वज्ञः तत्वगस्तीव्रः तपोरूपः तपोमयः ।
तुष्टिदस्तुष्टिकृत् तीक्ष्णः त्रिमूर्तिः त्रिगुणात्मकः ॥ ६४
तिलदीपप्रियश्चैव तस्य पीडानिवारकः ।
तिलोत्तमामेनकादिनर्तनप्रियएवच ॥ ६५
त्रिभागमष्टवर्गश्च स्थूलरोमा स्थिरस्तथा ।
स्थितः स्थायी स्थापकश्च स्थूलसूक्ष्मप्रदर्शकः ॥ ६६
दशरथार्चितपादश्च दशरथस्तोत्रतोषितः ।
दशरथप्रार्थनाकॢप्त दुर्भिक्ष विनिवारकः ॥ ६७
दशरथ प्रार्थनाकॢप्त वरद्वय प्रदायकः ।

दशरथस्वात्मदर्शी च दशरथाभीष्टदायकः ॥ ६८
दोर्भिर्धनुर्धरश्चैव दीर्घश्मश्रुजटाधरः ।
दशरथस्तोत्रवरदः दशरथाभीप्सितप्रदः ॥ ६९
दशरथस्तोत्रसन्तुष्टः दशरथेन सुपूजितः ।
द्वादश ष्टमजन्मस्थो देवपुङ्गवपूजितः ॥ ७०
देवदानवदर्पघ्नो दिनं प्रतिमुनि स्तुन ।
द्वादशस्थो द्वादशात्मा सुतो द्वादश नामभृत् ॥ ७१
द्वितीयस्थो द्वादशार्कसूनुः दैवज्ञपूजितः ।
दैवज्ञचित्तवासी चं दमयन्त्या सुपूजितः ॥ ७२
द्वादशाब्दंतु दुर्भिक्षकारी दुस्स्वप्ननाशनः ।

दुराराध्यो दुराधर्षः दमयन्ती वरप्रदः ॥ ७३
दुष्टदूरो दुराचार शमनो दोषवर्जितः ।
दुस्सहो दोषहन्ता च दुर्लभो दुर्गमस्तथा ॥ ७४
दुःखप्रदो दुःखहन्ता दीप्तरञ्जित दिङ्मुखः ।
दीप्यमान मुखांभोजः दमयन्त्याः शिवप्रदः ॥ ७५
दुर्निरीक्ष्यो दृष्टमात्र दैत्यमण्डलनाशकः ।
द्विजदानैकनिरतो द्विजाराधनतत्परः ॥ ७६
द्विजसर्वार्तिहरी च द्विजराज समर्चितः ।
द्विजदानैकनिरतश्च द्विजराज प्रियङ्करः ॥ ७७

द्विजो द्विजप्रियश्चैव द्विजराजेष्टदायकः ।
द्विजरूपो द्विजश्रेष्ठः दोषदो दुस्सहोपिच ॥ ७८
देवादिदेवो देवेशो देवराज सुपूजितः ।
देवराजेष्ट वरदो देवराज प्रियङ्करः ॥ ७९
देवादिवन्दितो दिव्यतनुर्देवशिखामणिः ।
देवगानप्रियश्चैव देवदेशिकपुङ्गवः ॥ ८०
द्विजात्मजसमाराध्यः ध्येयो धर्मी धनुर्धरः ।
धनुष्मान् धनदाता च धर्माधर्मविवर्जितः ॥ ८१
धर्मरूपो धनुर्दिव्यो धर्मशास्त्रात्मचेतनः ।
धर्मराज प्रियकरो धर्मराज सुपूजितः ॥ ८२

धर्मराजेष्टवरदो धर्माभीष्टफलप्रदः ।
नित्यतृप्तस्वभावश्च नित्यकर्मरतस्तथा ॥ ८३
निजपीडार्तिहारी च निजभक्तेष्टदायकः ।
निर्मांसदेहो नीलश्च निजस्तोत्र बहुप्रियः ॥ ८४
नळस्तोत्र प्रियश्चैव नळराजसुपूजितः ।
नक्षत्रमण्डलगतो नमतां प्रियकारकः ॥ ८५
नित्यार्चितपदाम्भोजो निजाज्ञा परिपालकः ।
नवग्रहवरो नीलवपुर्नळकरार्चितः ॥ ८६
नळप्रियानन्दितश्च नळक्षेत्रनिवासकः ।

नळपाक प्रियश्चैव नळपङ्कजनक्षमः ॥ ८७

नळसर्वार्तिहारी च नळेनात्मार्थपूजितः ।

निपाटवीनिवासश्च नळाभीष्टवरप्रदः ॥ ८८

नळतीर्थसकृत् स्नान सर्वपीडानिवारकः ।

नळेशदर्शनस्याशु साम्राज्यपदवीप्रदः ॥ ८९

नक्षत्रराश्याधिपश्च नीलध्वजविराजितः ।

नित्ययोगरतश्चैव नवरत्नविभूषितः ॥ ९०

विधा भज्यदेहश्च नवीकृतजगत्त्रयः ।

नवग्रहाधिपश्चैव नवाक्षरजपप्रियः ॥ ९१

नवात्मा नवचक्रात्मा नवतत्वाधिपस्तथा ।

नवोदन प्रियश्चैव नवधान्यप्रियस्तथा ॥ ९२
निष्कण्टको निस्पृहश्च निरपेक्षो निरामयः ।
नागराजार्चितपदो नागराजप्रियङ्करः ॥ ९३
नागराजेष्टवरदो नागाभरण भूषितः ।
नागेन्द्रगान निरतः नानाभरणभूषितः ॥ ९४
नवमित्र स्वरूपश्च नानाश्चर्यविधायकः ।
नानाद्वीपाधिकर्ता च नानालिपिसमावृतः ॥ ९५
नानारूप जगत् स्रष्टा नानारूपजनाश्रयः ।
नानालोकाधिपश्चैव नानाभाषाप्रियस्तथा ॥ ९६

नानारूपाधिकारी च नवरत्नप्रियस्तथा ।
नानाविचित्रवेषाढ्यः नानाचित्र विधायकः ॥ १७

नीलजीमूतसङ्काशो नीलमेघसमप्रभः ।
नीलाञ्जनचयप्रख्यः नीलवस्त्रधरप्रियः ॥ १८

नीचभाषा प्रचारज्ञो नीचे स्वल्पफलप्रदः ।
नानागम विधानज्ञो नानानृपसमावृतः ॥ ९९

नानावर्णाकृतिश्चैव नानावर्णस्वरार्तवः ।
नागलोकान्तवासी च नक्षत्रत्रयसंयुतः ॥ १००

नभादिलोकसंभूतो नामस्तोत्रबहुप्रियः ।
नामपारायणप्रीतो नामाश्चंनवरप्रदः ॥ १०१

नामस्तोत्रैकचित्तश्च नानारोगार्तिभञ्जनः ।
नवग्रहसमाराध्यः नवग्रह भयापहः ॥ १०२
नवग्रहसुसंपूज्यो नानावेद सुरक्षकः ।
नवग्रहाधिराजश्च नवग्रहजपप्रियः ॥ १०३
नवग्रहमयज्योतिः नवग्रह वरप्रदः ।
नवग्रहाणःमधिपो नवग्रह सुपीडितः ॥ १०४
नवग्रहाधीश्वरश्च नवमाणिक्यशोभितः ।
परमात्मा परब्रह्म परमैश्वर्यकारणः ॥ १०५
प्रपञ्चभयहारी च प्रमत्तासुरशिक्षकः ।

पञ्चपाण्डवपुत्राणां सर्वारिष्ट निवारकः ।
पाण्डुपुत्राद्यर्चितश्च पूर्वजश्च प्रपञ्चभृत् ॥ ११६

परचक्रप्रभेदी च पाण्डवेषु वनप्रदः ।
परब्रह्म स्वरूपश्च पराज्ञा परिवर्जितः ॥ ११७

परात्परः पाशहन्ता परमाणुः प्रपञ्चकृत् ।
पातङ्गी पुरुषाकारः परशंभुसमुद्भवः ॥ ११८

प्रसन्नात्सर्वसुखदः प्रपञ्चोद्भवसंभवः ।
प्रसन्नः परमोदारः पराहङ्कारभञ्जनः ॥ ११९

परः परमकारुण्यः परब्रह्ममयस्तथा ।

प्रपन्नभयहारी च प्रणतार्तिहरस्तथा ॥ १२०

प्रपञ्चात्मा प्रसविता पुराण पुरुषोत्तमः ॥ १११
पुराण पुरुषश्चैव पुरुहूतः प्रपञ्चधृत् ।
प्रतिष्ठितः प्रीतिकरः प्रियकारी प्रयोजनः ॥ ११२
प्रीतिमान् प्रवरस्तुत्यः पुरूरवसमर्चितः ।
प्रपञ्चकारी पुण्यश्च पुरुहूत समर्चितः ॥ ११३
पाण्डवादि सुसंसेव्यः प्रणवः पुरुषार्थदः ।
पयोदसमवर्णश्च पाण्डुपुत्रार्तिभञ्जनः ॥ ११४
पाण्डुपुत्रेष्टदाता च पाण्डवानां हितङ्करः ।
पञ्चपाण्डवपुत्राणां सर्वाभीष्टफलप्रदः ॥ ११५

पञ्चपाण्डवपुत्राणां सर्वारिष्ट निवारकः ।
पाण्डुपुत्राद्यर्चितश्च पूर्वजश्च प्रपञ्चभृत् ॥ ११६

परचक्रप्रभेदी च पाण्डवेषु वनप्रदः ।
परब्रह्म स्वरूपश्च पराज्ञा परिवर्जितः ॥ ११७

परात्परः पाशहन्ता परमाणुः प्रपञ्चकृत् ।
पातङ्गी पुरुषाकारः परशंभुसमुद्भवः ॥ ११८

प्रसन्नात्सर्वसुखदः प्रपञ्चोद्भवसंभवः ।
प्रसन्नः परमोदारः पराहङ्कारभञ्जनः ॥ ११९

परः परमकारुण्यः परब्रह्ममयस्तथा ।
प्रपन्नभयहारी च प्रणतार्तिहरस्तथा ॥ १२०

प्रसादकृत् प्रपञ्चश्च पराशक्ति समुद्भवः ।
प्रदानपावनश्चैव प्रशान्तात्मा प्रभाकरः ॥ १२१

प्रपञ्चात्मा प्रपञ्चोपशमनः पृथिवीपतिः ।
परशुराम समाराध्यः परशुरामवरप्रदः ॥ १२२

परशुराम चिरञ्जीविप्रदः परमपावनः ।
परमहंसस्वरूपश्च परमहंससुपूजितः ॥ १२३

पञ्चनक्षत्राधिपश्च पञ्चनक्षत्रसेवितः ।
प्रपञ्च रक्षितश्चैव प्रपञ्चस्य भयङ्करः ॥ १२४

फलदानप्रियश्चैव फलहस्तः फलप्रदः ।

फलाभिषेकप्रियश्च फल्गुनस्य वरप्रदः ॥ १२५
पुटच्छमित पापौघः फल्गुनेन प्रपूजितः ।
फणिराजप्रियश्चैव पुल्लाम्बुज विलोचनः ॥ १२६
बलिप्रियो बली बभ्रुः ब्रह्मविष्णवीश क्लेशकृत् ।
ब्रह्मविष्णीशरूपश्च ब्रह्मशक्रादिदुर्लभः ॥ १२७
वासदंष्ट्र्यां प्रमेयाङ्गो बिभ्रत्कवचकुण्डलः ।
बहुश्रुतो बहुमतिः ब्रह्मण्यो ब्राह्मणप्रियः ॥ १२८
बलप्रमथनो ब्रह्मा बहुरूपो बहुप्रदः ।
बालार्कद्युतिमान्बालो बृहद्वक्षो बृहत्तमः ॥ १२९
ब्रह्माण्डभेदकृच्चैव भक्तसर्वार्थसाधकः ।

भव्यो भोक्ता भीतिकृच्च भक्तानुग्रहकारकः ॥ १३०
भीषणो भैक्षकारी च भूसुरादि सुपूजितः ।
भोगभाग्यप्रदश्चैव भस्मीकृत जगत्त्रयः ॥ १३१
भयानको भानुसूनुः भूतिभूषित विग्रहः ।
भास्वद्रतो भक्तिमतां सुलभो भ्रुकुटीमुखः ॥ १३२
भवभूत गणैस्स्तुत्यो भूतसङ्घसमावृतः ।
भ्राजिष्णु भंगवान्भीमो भक्ताभीष्टवरप्रदः ॥ १३३
भवभक्तैकचित्तश्च भक्तिगीतस्तवोन्मुखः ।
भूतसन्तोषकारी च भक्तानां चित्तशोधकः ॥ १३४

भक्तिगम्यो भयहरो भावज्ञो भक्तसुप्रियः ।
भूतिदो भूतिकृत् भोज्यो भूतात्मा भुवनेश्वरः ॥ १३५

मन्दो मन्दगतिश्चैव मासमेव प्रपूजितः ।
मुचुकुन्द समाराध्यो मुचुकुन्द वरप्रदः ॥ १३६

मुचुकुन्दार्चितपदो महारूपो महायशाः ।
महाभोगी महायोगी महाकायो महाप्रभुः ॥ १३७

महेशो महदैश्वर्यो मन्दार कुसुमप्रियः ।
महाक्रतुर्महामानी महाधीरो महाजयः ॥ १३८

महावीरो महाशान्तो मण्डलस्थो महाद्युतिः ।
महासुतो महादातो महत्तीयो महोदयः ॥ १३९

मैथिलीवरदायी च मार्ताण्डस्य द्वितीयजः ।
मैथिलीप्रार्थनाक्लृप्त दशकण्ठ शिरोपहृत् ॥ १४०
मरामरहराराध्यो महेन्द्रादि सुरार्चितः ।
महारथो महावेगो मणिरत्नविभूषितः ॥ १४१
मेषनीचो महाघोरो महासौरि र्मनुप्रियः ।
महादीर्घो महाग्रासो महदैश्वर्यदायकः ॥ १४२
महाशुष्को महारौद्रो मुक्तिमार्ग प्रदर्शकः ।
मकरकुम्भाधिपश्चैव मृकण्डुतनयार्चितः ॥ १४३
मन्त्राधिष्ठानरूपश्च मल्लिकाकुसुमप्रियः ।

महामन्त्र स्वरूपश्च महायन्त्रस्थितस्तथा ॥ १४४
महाप्रकाशदिव्यात्मा महादेवप्रियस्तथा ।
महाबलि समाराध्यो महर्षिगणपूजितः ॥ १४५
मन्दचारी महामायी माषदानप्रियस्तथा ।
माषोदन प्रीतचित्तो महाशक्ति र्महागुणः ॥ १४६
यशस्करो योगदाता यज्ञाङ्गोऽपि युगन्धरः ।
योगी योग्यश्च याम्यश्च योगरूपी युगाधिपः ॥ १४७
यज्ञभृद्यजमानश्च योगो योगविदां वरः ।
यक्षराक्षसवेताळ कूष्माण्डादिप्रपूजितः ॥ १४८
यमप्रत्यधिदेवश्च युगपत् भोगदायकः ।

योगप्रियो योगयुक्तो यज्ञरूपो युगान्तकृत् ॥ १४९
रघुवंश समाराध्यो रौद्रो रौद्राकृति स्तथा ।
रघुनन्दन सल्लापो रघुप्रोक्त जपप्रियः ॥ १५०
रौद्ररूपी रथारूढो राघवेष्ट वरप्रदः ।
रथी रौद्राधिकारी च राघवेण समर्चितः ॥ १५१
रोषात्सर्वस्वहारी च राघवेण सुपूजितः ।
राशिद्वयाधिपश्चैव रघुभिः परिपूजितः ॥ १५२
राज्यभूपाकरश्चैव राजराजेन्द्र वन्दितः ।
रत्नकेयूरभूषाढ्यो रमानन्दनवन्दितः ॥ १५३

रघुपौ षसन्तुष्टो रघुस्तोत्रबहुप्रियः ।
रघुवंशनृपैः पूज्यो रणन्मञ्जीरनूपुरः ॥ १५४
रविनन्दन राजेन्द्रो रघुवंशप्रियस्तथा ।
लोहजप्रतिमादानप्रियो लावण्यविग्रहः ॥ १५५
लोकचूडामणिश्चैव लक्ष्मीवाणीस्तुतिप्रियः ।
लोकरक्षो लोकशिक्षो लोकलोचनरञ्जितः ॥ १५६
लोकाध्यक्षो लोकवन्द्यो लक्ष्मणाग्रजपूजितः ।
वेदवेद्यो वज्रदेहो वज्राङ्कुशधरस्तथा ॥ १५७
विश्ववन्द्यो विरूपाक्षो विमलाङ्गविराजितः ।
विश्वक्षो वायसारूढो विशेषसुखका- १५८

विश्वरूपी विश्वगोप्ता विभावसु सुतस्तथा ।
विप्रप्रियो विप्ररूपो विप्राराधन तत्परः ॥ १५९
विशालनेत्रो विशिखो विप्रदानबहुप्रियः ।
विश्वसृष्टि समुद्भूतो वैश्वानरसमद्युतिः ॥ १६०
विष्णुर्विरिञ्चिर्विश्वेशो विश्वकर्ता विशाम्पतिः ।
विराडाधारचक्रस्थो विश्वभुग्विश्वभावनः ॥ १६१
विश्वव्यापारहेतुश्च वक्रक्रूरविवर्जितः ।
विश्वोद्भवो विश्वकर्मा विश्वसृष्टि विनायकः ॥ १६२
विश्वमूलनिवासी च विश्वचित्रविधायकः ।

विश्वधारविलासी च व्यासेन कृतपूजितः ॥ १६३

विभीषणेष्टवरदो वाञ्छितार्थप्रदायकः ।

विभीषणसमाराध्यो विशेषसुखदायकः ॥ १६४

विषमव्ययाष्टजन्मस्थोऽप्येकादशफलप्रदः ।

वासवात्मजसुप्रीतो वसुदो वासवार्च्चितः ॥ १६५

विश्वत्राणैकनिरतो वाङ्मनोतीतविग्रहः ।

विराणमन्दिरमूलस्थो वलीमुखसुखप्रदः ॥ १६६

विपाशो विगतातङ्को विकल्पपरिवर्जितः ।

वरिष्ठो वरदो वन्द्यो विचित्राङ्गो विरोचनः ॥ १६७

शुष्कोदरः शुक्लवपुः शान्तरूपी शनैश्चरः ।

शूली शरण्यः शान्तश्च शिवायामप्रियङ्करः ॥ १६८
शिवभक्तिमतां श्रेष्ठः शूलपाणिश्शुचिप्रियः ।
श्रुतिस्मृतिपुराणज्ञः श्रुतिजालप्रबोधकः ॥ १६९
श्रुतिपारग संपूज्यः श्रुतिश्रवणलोलुपः ।
श्रुत्यन्तर्गतमर्मज्ञः श्रुत्येष्टवरदायकः ॥ १७०
श्रुतिरूपः श्रुतिप्रीतः श्रुतीप्सितफलप्रदः ।
शुचिश्रुतः शान्तमूर्तिः श्रुतिः श्रवणकीर्तनः ॥ १७१
शमीमूलनिवासी च शमीकृतफलप्रदः ।
शमीकृतमहाघोरः शरणागतवत्सलः ॥ १७२

शमीतरुस्वरूपश्च शिवमन्त्रज्ञमुक्तिदः ।
शिवागमैकनिलयः शिवमन्त्रजपप्रियः ॥ १७३

शमीपत्रप्रियश्चैव शमीपर्णसमर्चितः ।
शतोपनिषदस्तुत्यो शान्त्यादिगुणभूषितः ॥ १७४

शान्त्यादिषड्गुणोपेतः शङ्खनादप्रियस्तथा ।
श्यामरक्तसितज्योतिः शुद्धपञ्चाक्षरप्रियः ॥ १७५

श्रीहालास्यक्षेत्रवासी श्रीमान् शक्तिधरस्तथा ।
षोडशद्वयसंपूर्णलक्षणः षण्मुखप्रियः ॥ १७६

षड्गुणैश्वर्यसंयुक्तः षडङ्गावरणोज्ज्वलः ।
षडक्षरस्वरूपश्च षट्चक्रोपरि संस्थितः ॥ १७७

षोडशी षोडशान्तश्च षट्छक्तिव्यक्तमूर्तिमान् ।
षड्भावरहितश्चैव षडङ्गश्रुतिपारगः ॥ १७८

षट्कोणमध्यनिलयः षट्शास्त्रस्मृतिपारगः ।
स्वर्गेन्द्रनीलमकुटः सर्वाभीष्टप्रदायकः ॥ १७९

सर्वात्मा सर्वदोषघ्नः सर्वगर्वप्रभञ्जनः ।
समस्तलोकाभयदः सर्वदोषाङ्गनाशकः ॥ १८०

समस्तभक्तसुखदः सर्वदोषनिवर्तकः ।
सर्वनाशक्षमस्सौम्यः सर्वक्लेशनिवारकः ॥ १८१

सर्वात्मा सर्वदा तुष्टः सर्वपीडानिवारकः ।

सर्वरूपी सर्वकर्मा सर्वज्ञः सर्वकारकः ॥ १८२

सुकृती सुलभश्चैव सर्वाभीष्टफलप्रदः ।
सूरात्मजस्सदातुष्टः सूर्यवंशप्रदीपनः ॥ १८३

सप्तद्वीपाधिपश्चैव सुरासुरभयङ्करः ।
सर्वसंक्षोभहारी च सर्वलोकहितङ्करः ॥ १८४

सर्वौदार्यस्वभावश्च सन्तोषात्सकलेष्टदः ।
समस्तऋषिभिस्संतुत्यः समस्तगणपावृतः ॥ १८५

समस्तगणसंसेव्यः सर्वारिष्टविनाशनः ।
सर्वसौख्यप्रदाता च सर्वव्याकुलनाशनः ॥ १८६

सर्वसंक्षोभहारी च सर्वारिष्ट फलप्रदः ।

सर्वव्याधिप्रशमनः सर्वमृत्युनिवारकः ॥ १८७

सर्वानुकूलकारी च सौन्दर्यमृदुभाषितः ।

सौराष्ट्रदेशोद्भवश्च स्वक्षेत्रेष्टवरप्रदः ॥ १८८

सोमयाजि समाराध्यः सीताभीष्ट वरप्रदः ।

सुखासनोपविष्टश्च सद्यःपीडानिवारकः ॥ १८९

सौदामनीसन्निभश्च सर्वानुल्लङ्घ्यशासनः ।

सूर्यमण्डलसञ्चारी संहारास्त्रनियोजितः ॥ १९०

सर्वलोकक्षयकरः सर्वारिष्टविधायकः ।

सर्वव्याकुलकारी च सहस्रजपसुप्रियः ॥ १९१

सुखासनोपविष्टश्च संहाराङ्गप्रदर्शितः ।
सर्वालङ्कार संयुक्तकृष्णगोदानसुप्रियः ॥ १९२

सुप्रसन्नस्सुरश्रेष्ठः सुघोषः सुखदस्सुहृत् ।
सिद्धार्थः सिद्धसङ्कल्पः सर्वज्ञस्सर्वदस्सुखी ॥ १९३

सुग्रीवस्सुधृतिस्सारस्सुकुमार स्सुलोचनः ।
सुव्यक्तस्सच्चिदानन्दः सुवीरस्सुजनाश्रयः ॥ १९४

हरिश्चन्द्रसमाराध्यो हेयेपादेयवर्जितः ।
हरिश्चन्द्रेष्टवरदो हंसमन्त्रादि संस्तुतः ॥ १९५

हंसवाह समाराध्यो हंसवाहवरप्रदः ।

हृद्यो हृष्टो हरिसखो हंसो हंसगतिर्हविः ॥ १९६

हिरण्यवर्णो हितकृद्धर्षदो हेमभूषणः ।
हविर्होता हंसगति हंसमन्त्रादिसंस्तुतः ॥ १९७

हनूमदर्चितपदो हलधृत् पूजितस्सदा ।
क्षेमदः क्षेमकृत्क्षेम्यः क्षेत्रज्ञः क्षामवर्जितः ॥ १९८

क्षुद्रघ्नः क्षान्तिदः क्षेमः क्षितिभूषः क्षमाश्रयः ।
क्षमाधरः क्षयद्वारो नाम्नामष्टसहस्रकम् ॥ १९९

वाक्येनैकेन वक्ष्यामि वाञ्छितार्थं प्रयच्छति ।
तस्मात्सर्वप्रयत्नेन नियमेन जपेत्सुधीः ॥ २००

शनैश्चरसहस्रनामस्तोत्रं सम्पूर्णम्

|| श्रीरस्तु ||

|| शनैश्चरसहस्रनामावळिः ||



ओं अमितभाषिणे नमः
अघहराय
अशेषदुरितापहाय
अघोररूपाय
अतिदीर्घकायाय
अशेषभयानकाय
अनन्ताय
अन्नदात्रे

ओं अश्वत्थमूलजपप्रियाय नमः
अतिसंपत्प्रदाय १०
अमोघाय
अन्यस्तुत्याप्रकोपिताय
अपराजिताय
अद्वितीयाय
अतितेजसे
अभयप्रदाय

अष्टमस्थाय नमः
अञ्जननिभाय
अखिलात्मने
अर्कनन्दनाय २०
अतिदारुणाय
अक्षोभ्याय
अप्सरोभिः प्रपूजिताय
अभीष्टफलदाय
अविघ्नमथनाय

अमरपूजिताय नमः
अनुग्राह्याय
अप्रमेयपराक्रमविभीषणाय
असाध्ययोगाय
अखिलदोषघ्नाय ३०
अपराकृताय
अप्रमेयाय
अतिसुखदाय
अमराधिपपूजिताय

अवलोकात्सर्वनाशाय
अश्वत्थामद्विरायुधाय
अपराधसहिष्णवे
अश्वत्थामसुपूजिताय
अनन्तपुण्यफलदाय
अतृप्ताय ४०
अतिबलाय
अवलोकात्सर्ववन्द्याय
अक्षीणकरुणानिधये
अविद्यामूलनाशाय

अक्षय्यफलदायकाय
आनन्दपरिपूर्णाय
आयुष्कारकाय
आश्रितेष्टार्थवरदाय
आधिव्याधिहराय
आनन्दमयाय ५०
आनन्दकराय
आयुधधारकाय
आत्मचक्राधिकारिणे
आत्मतत्त्वपरायणाय

ओं आयुष्कराय नमः
आनुपूर्व्याय
आत्मायत्तजगत्त्रयाय
आत्मनामजपप्रीताय
आत्माधिकफलप्रदाय
आदित्यसंभवाय ६०
आर्तिभञ्जनाय
आत्मरक्षकाय
आपद्बान्धवाय

ओं आनन्दरूपाय नमः
आयुःप्रदाय
आकर्णपूर्णचापाय
आत्मोद्दिष्टद्विजप्रदाय
आनुकूल्याय
आत्मरूपप्रतिमादानसुप्रियाय
आमारामाय ७०
आदिदेवाय
आपन्नार्तिविनाशनाय

इन्दिरार्चितपादाय
इन्द्रभोगफलप्रदाय
इन्द्रदेवस्वरूपाय
इष्टेष्टवरदायकाय
इष्टापूर्तिप्रदाय
इन्दुमतीष्टवरदायकाय
इन्दिरारमणप्रीताय
इन्द्रवंशनृपार्चिताय ८०
इहामुत्रेष्टफलदाय
इन्दिरारमणार्चिताय

ईड्याय
ईश्वरप्रीताय
ईषणात्रयवर्जिताय
उमास्वरूपाय
उद्बोध्याय
उशनाय
उत्सवप्रियाय
उमादेव्यर्चनप्रीताय ९०
उच्चस्थोच्चफलप्रदाय
उरुप्रकाशाय

ॐ उच्चस्थयोगदाय नमः
उरुपराक्रमाय
ऊर्ध्वलोकादिसञ्चारिणे
ऊर्ध्वलोकादिनायकाय
ऊर्जस्विने
ऊनपादाय
ऋकाराक्षरपूजिताय
ऋषिप्रोक्तपुराणज्ञाय १००
ऋषिभिः परिपूजिताय

ॐ ऋग्वेदवन्द्याय नमः
ऋग्रूपिणे
ऋजुमार्गप्रवर्तकाय
लुळितोद्धारकाय
लूतभवपाश प्रभञ्जनाय
लृकाररूपकाय
लब्धधर्ममार्गप्रवर्तकाय
एकाधिपत्यसाम्राज्यप्रदाय
एनौघनाशनाय ११०

एकपादे
एकस्मै
एकोनविंशतिमासभुक्तिदाय
ऐकोनविंशतिवर्षदशाय
एणाङ्कपूजिताय
ऐश्वर्यफलप्रदाय
ऐन्द्राय
ऐरावतसुपूजिताय
ओङ्कारजपसुप्रीताय
ओङ्कारवारिपूजिताय १२०

ओङ्कारबीजाय
औदार्यहस्ताय
औन्नत्यकायकाय
औदार्यगुणाय
औदार्यशीलाय
औषधकारकाय
करपङ्कजसन्नद्धधनुषे
करुणानिधये
कालाय
कठिनचित्ताय नमः १३०

ओं कालमेघसमप्रभाय नमः
किरीटिने
कर्मकृते
कारयित्रे
कालसहोदराय
कालाम्बराय
काकवाहाय
कर्मठाय
काश्यपान्वयाय

ओं कालचक्रप्रभेदिने नमः १४०
कालरूपिणे
कारणाय
कारिमूर्तये
कालभर्त्रे
किरीटमकुटोज्ज्वलाय
कार्यकारणकालज्ञाय
काञ्चनाभरथान्विताय
कालदंष्ट्राय

क्रोधरूपाय
कराळिने १५०
कृष्णकेतनाय
कालात्मने
कालकर्त्रे
कृतान्ताय
कृष्णगोप्रियाय
कालाग्निरुद्ररूपाय
कश्यपात्मजसंभवाय
कृष्णवर्णहयाय

कृष्णगोक्षीरसुप्रियाय
कृष्णगोघृतसुप्रीताय १६०
कृष्णगोदधिसुप्रियाय
कृष्णगावैकचित्ताय
कृष्णगोदानसुप्रियाय
कृष्णगोदत्तहृदयाय
कृष्णगोरक्षणाप्रियाय
कृष्णगोग्रासचित्तस्य सर्वपीडा-
निवारकाय
कृष्णगोदानशान्तस्य सर्व-

शान्तिफलप्रदाय

कृष्णगोस्नानकामस्य गङ्गा-
स्नानफलप्रदाय

ओं कृष्णगोरक्षणस्यास्तु सर्वाभीष्ट-
फलप्रदाय

कृष्णगावप्रियाय १७०

कपिलापशुषुप्रियाय

कपिलाक्षीरपानस्य सोमपान-
फलप्रदाय

ओं कपिलादानसुप्रीताय नमः

कपिलाज्यहुतप्रियाय

कृष्णाय

कृत्तिकान्तस्थाय

कृष्णगोवत्ससुप्रियाय

कृष्णमाल्याम्बरधराय

कृष्णवर्णतनूरुहाय

कृष्णकेतवे १८०

कृशकृष्णदेहाय

कृष्णांबरप्रियाय

क्रूरचेष्टाय

क्रूरभावाय

क्रूरदंष्ट्राय

कुरूपिणे

कमलापतिसंसेव्याय

कमलोद्भवपूजिताय

कामितार्थप्रदाय

कामधेनुपूजनसुप्रियाय १९०

कामधेनुसमाश्रयाय

कृपापीयूषविवर्धनाय

कामधेन्वैकचित्ताय

कृपराजसुपूजिताय

कामदोग्ध्रे

क्रुद्धाय

कुरुवंशसुपूजिताय

कृष्णाङ्गमहिषीदोग्ध्रे

कृष्णेनकृतपूजनाय

कृष्णाङ्गमहिषीदानप्रियाय

कोपस्थाय

ओं कृष्णाङ्गमहिषीदानलोलुपाय
कामपूजिताय
क्रूरावलोकनात्सर्वनाशाय
कृष्णाङ्गदप्रियाय
खद्योताय
खण्डनाय
खड्गधराय
खेचरपूजिताय
खरांशुतनयाय २१०

ओं खगानांपतिवाहनाय नमः
गोसवासक्तहृदयाय
गोचरस्थानदोषहृते
गृहराश्यधिपाय
गृहराजमहाबलाय
गृध्रवाहाय
गृहपतये
गोचराय
गानलोलुपाय

घोराय २२०
घर्माय
घनतमसे
घर्मिणे
घनकृपान्विताय
घननीलाम्बरधराय
ङादिवर्णसुसंज्ञिताय
चक्रवर्तिसमाराध्याय
चन्द्रमत्यासमर्चिताय
चन्द्रमत्यार्तिहारिणे

चराचरसुखप्रदाय २३०
चतुर्भुजाय
चापहस्ताय
चराचरहितप्रदाय
छायापुत्राय
छत्रधराय
छायादेवीसुताय
जयप्रदाय
जगन्नीलाय
जपतां सर्वसिद्धिदाय

ॐ जपविध्वस्तविमुखाय २४०
जंभारिपरिपूजिताय
जंभारिवन्द्याय
जयदाय
जगज्जनमनोहराय
जगत्त्रयप्रकुपिताय
जगत्त्राणपरायणाय
जयाय
जयप्रदाय

ॐ जगदानन्दकारकाय नमः
ज्योतिषे २५०
ज्योतिषांश्रेष्ठाय
ज्योतिश्शास्त्रप्रवर्तकाय
झर्झरीकृतदेहाय
झल्लरीवाद्यसुप्रियाय
ज्ञानमूर्तये
ज्ञानगम्याय
ज्ञानिने

ज्ञानमहानिधये
ज्ञानप्रबोधकाय
ज्ञानदृष्ट्यावलोकिताय
टङ्किताखिललोकाय
टङ्कितैनस्तमेरवये
टङ्कारकारकाय
टङ्कृताय
टाम्भदप्रियाय
ठकारमयसर्वस्वाय
ठकारकृतपूजिताय

ढक्कावाद्यप्रीतिकराय
डमड्डमरुकप्रियाय
डंबरप्रभवाय २७०
डंभाय
ढक्कानादप्रियङ्कराय
डाकिनीशाकिनीभूतसर्वोपद्र -
वकारकाय
डाकिनीशाकिनीभूतसर्वोपद्र -
वनाशकाय
ढकाररूपाय
ढांभिकाय

ओं णकारजपसुप्रियाय नमः
णकारमयमन्त्रार्थाय
णकारैकशिरोमणये
णकारवचनानन्दाय २८०
णकारकरुणामयाय
णकारमयसर्वस्वाय
णकारैकपरायणाय
तर्जनीधृतमुद्राय
तपसां फलदायकाय
त्रिविक्रमनुताय

ओं त्रयीमयवपुर्धराय नमः
तपस्विने
तपसादग्धदेहाय
ताम्रधराय २९०
त्रिकालवेदितव्याय
त्रिकालमतितोषिताय
तुलोच्चयाय
त्रासकराय
तिलतैलप्रियाय

तिलान्नसन्तुष्टमनसे
तिलदानप्रियाय
तिलभक्ष्यप्रियाय
तिलचूर्णप्रियाय
तिलखण्डप्रियाय ३००
तिलापूपप्रियाय
तिलहोमप्रियाय
तापत्रयनिवारकाय
तिलतर्पणसन्तुष्टाय
तिलतैलान्नतोषिताय

तिलैकदत्तहृदयाय
तेजस्विने
तेजसान्निधये
तेजसादित्यसङ्काशाय
तेजोमयवपुर्धराय ३१०
तत्वज्ञाय
तत्वगाय
तीव्राय
तपोरूपाय
तपोमयाय

ओं तुष्टिदाय नमः
तुष्टिकृते
तीक्ष्णाय
त्रिमूर्तये
त्रिगुणात्मकाय ३२०
तिलदीपप्रियाय
तस्यपीडानिवारकाय
तिलोत्तमामेनकादिनर्तनप्रियाय
त्रिभागमष्टवर्गाय

ओं स्थूलरोम्णे नमः
स्थिराय
स्थिताय
स्थायिने
स्थपकाय
स्थूलसूक्ष्मप्रदर्शकाय ३३०
दशरथार्चितपादाय
दशरथस्तोत्रतोषिताय
दशरथप्रार्थनाक्लृप्तदुर्भिक्षवि-

निवारकाय
दशरथप्रार्थनाक्लृप्तवरद्वयप्रदा-
यकाय
दशरथस्वात्मदर्शिने
दशरथाभीष्टदायकाय
दोर्भिर्धनुर्धराय
दीर्घश्मश्रुजटाधराय
दशरथस्तोत्रवरदाय
दशरथाभीप्सितप्रदाय ३४०
दशरथस्तोत्रसन्तुष्टाय

दशरथेनसुपूजिताय
द्वादशाष्टमजन्मस्थाय
देवपुङ्गवपूजिताय
देवदानवदर्पघ्नाय
दिनंप्रतिमुनिस्तुताय
द्वादशस्थाय
द्वादशात्मसुताय
द्वादशनामभृते
द्वितीयस्थाय ३५०
द्वादशार्कसूनवे

ओं दैवज्ञपूजिताय नमः
दैवज्ञचित्तवासिने
दमयन्त्यासुपूजिताय
द्वादशाब्दंतुदुर्भिक्षकारिणे
दुःस्वप्ननाशनाय
दुरराध्याय
दुराधर्षाय
दमयन्तीवरप्रदाय
दुष्टदूराय १६०
दुराचारशमनाय

ओं दोषवर्जिताय नमः
दुस्सहाय
दोषहन्त्रे
दुर्लभाय
दुर्गमाय
दुःखप्रदाय
दुःखहन्त्रे
दीर्घ[illegible]
दीप्यमानमुखांभोजाय ३७०

दमयन्त्याशिशत्रप्रदाय
दुर्निरीक्ष्याय
दृष्टनात्रदैत्यमण्डलनाशकाय
द्विजदानैकनिरताय
द्विजाराधनतत्पराय
द्विजसर्वाविहारिणे
द्विजराजसमर्चिताय
द्विजदानैकचित्ताय
द्विजराजप्रियङ्कराय
द्विजाय ३८०

द्विजप्रियाय
द्विजराजेष्टदायकाय
द्विजरूपाय
द्विजश्रेष्ठ:य
दोषदाय
दुस्सहाय
देवादिदेवाय
देवेशाय
देवराजसुपूजिताय
देवराजेष्टवरदाय ३९०

ओं देवराजप्रियङ्कराय नमः
देवादिवन्दिताय
दिव्यतनवे
देवशिखामणये
देवगानप्रियाय
देवदेशिकपुङ्गवाय
द्विजात्मजासमाराध्याय
ध्येयाय
धर्मिणे

ओं धनुर्धराय नमः ४००
धनुष्मते
धनदात्रे
धर्माधर्मविवर्जिताय
धर्मरूपाय
धनुर्दिव्याय
धर्मशास्त्रात्मचेतनाय
धर्मराजप्रियकराय
धर्मराजसुपूजिताय

धर्मराजेष्टवरदाय
धर्माभीष्टफलप्रदाय ४१०
नित्यतृप्तस्वभावाय
नित्यकर्मरताय
निजपीडाविहारिणे
निजभक्तेष्टदायकाय
निर्मांसदेहाय
नीळाय
निजस्तोत्रबहुप्रियाय
नळस्तोत्रप्रियाय

नळराजसुपूजिताय
नक्षत्रमण्डलगताय ४२०
नमतांप्रियकारकाय
नित्यार्चितपदांभोजाय
निजाज्ञापरिपालकाय
नवग्रहवराय
नीलवपुषे
नळकरार्चिताय
नळप्रियानन्दिताय
नळक्षेत्रनिवासकाय

ॐ नैळेपांकप्रियाय नमः
नळापङ्कजनक्षमाय ४३०
नळसर्वार्तिहारिणे
नळेनात्मार्थपूजिताय
नीपाटवीनिवासाय
नळाभीष्टवरप्रदाय
नक्षतीर्थसकृत् स्नान सर्व-
पीडानिवारकाय
नळेशदर्शनस्यायुसाम्राज्यपद -
वीप्रदाय नमः
नक्षत्रराश्यधिपाय
नीलध्वजविराजिताय
नित्ययोगरताय
नवरत्नविभूषिताय ४४०
नवधाभज्यदेहाय
नवीकृतजगत्त्रयाय
नवग्रहाधिपाय
नवाक्षरजपप्रियाय

नवात्मने
नवचक्रात्मने
नवतत्त्वाधिपाय
नवोदनप्रियाय
नवधान्यप्रियाय
निष्कण्टकाय ४५०
निस्पृहाय
निरपेक्षाय
निरामयाय
नगराजार्चितपदाय

नागराजप्रियङ्कराय
नागराजेष्टवरदाय
नागाभरणंभूषिताय
नागेन्द्रगाननिरताय
नागाभरणभूषिताय
नवमित्रस्वरूपाय ४६०
नानाश्चर्यविधायकाय
नानाद्वीपाधिकर्त्रे
नानालिपिसमावृताय
नानारूपजनस्रष्ट्रे

ॐ नानारूपजनाश्रयाय नमः
नानालोकाधिपाय
नानाभाषाप्रियाय
नानारूपाधिकारिणे
नवरत्नप्रियाय
नानाविचित्रवेषाढ्याय ४७०
नानाविचित्रविधायकाय
नीलजीमूतसङ्काशाय
नीलमेघसमप्रभाय

ॐ नीलाञ्जनचयप्रख्याय नमः
नीलवस्त्रधरप्रियाय
नीचभाषाप्रचारज्ञाय
नीचेस्वल्पफलप्रदाय
नानागमविधानज्ञाय
नानानृपसमावृताय
नानावर्णाकृतये ४८०
नानावर्णस्वरार्तवाय
नागलोकान्तवासिने

नक्षत्रत्रयसंयुताय
नभादिलोकसंभूताय
नामस्तोत्रबहुप्रियाय
नामपारायणप्रीताय
नामार्चनवरप्रदाय
नामस्तोत्रैकचित्ताय
नानारोगार्तिभञ्जनाय
नवग्रहसमाराध्याय ४९०
नवग्रहभयापहाय
नवग्रहसुसंपूज्याय

नानावेधासुरक्षकाय
नवग्रहाधिराजाय
नवग्रहजपप्रियाय
नवग्रहमयज्योतिषे
नवग्रहवरप्रदाय
नवग्रहाणामधिपाय
नवग्रहसुपीडिताय
नवग्रहाधीश्वराय ५००
नवमाणिक्यशोभिताय
परमात्मने

ओं परब्रह्मणे नमः
परमैश्वर्यकारणाय
प्रपन्नभयहारिणे
प्रमत्तासुरशिक्षकाय
प्रासहस्ताय
पङ्गुपादाय
प्रकाशात्मने
प्रतापवते ५१०
पावनाय

ओं परिशुद्धात्मने नमः
पुत्रपौत्रप्रवर्धनाय
प्रसन्नात्सर्वसुखदाय
प्रसन्नेक्षणाय
प्रजापत्याय
प्रियकराय
प्रणतेप्सितराज्यदाय
प्रजानांजीवहेतवे
प्राणिनांपरिपालकाय ५२०

प्राणरूपिणे
प्राणधारिणे
प्रजानांहितकारकाय
प्राज्ञाय
प्रशान्ताय
प्रज्ञावते
प्रजारक्षणदीक्षिताय
प्रावृषेण्याय
प्राणकारिणे
प्रसन्नोत्सववन्दिताय ५३०

प्रज्ञानिवासहेतवे
पुरुषार्थैकसाधनाय
प्रजाकराय
प्रातिकूल्याय
पिङ्गलाक्षाय
प्रसन्नाधिये
प्रपञ्चात्मने
प्रसवित्रे
पुराणपुरुषोत्तमाय
पुराणपुरुषाय ५४०

ओं पुरुहूताय नमः
प्रपञ्चधृते
प्रतिष्ठिताय
प्रीतिकराय
प्रियकारिणे
प्रयोजनाय
प्रीतिमते
प्रवरस्तुत्याय
पुरूरवसमर्चिताय

ओं प्रपञ्चकारिणे नमः ५५०
पुण्याय
पुरुहूतसमर्चिताय
पाण्डवादिसुसंसेव्याय
प्रणवाय
पुरुषार्थदाय
पयोदसमवर्णाय
पाण्डुपुत्रार्तिभञ्जनाय
पाण्डुपुत्रेष्टदात्रे

पाण्डवानांहितङ्कराय

पञ्चपाण्डवपुत्राणां सर्वाभीष्ट-
फलप्रदाय ५६०

पञ्चपाण्डवपुत्राणां सर्वारिष्ट -
निवारकाय

पाण्डुपुत्राद्यर्चिताय

पूर्वजाय

प्रपञ्चभृते

परचक्रप्रभेदिने

पाण्डवेषुवरप्रदाय

परब्रह्मस्वरूपाय

पराज्ञापरिवर्जिताय

परात्पराय

पाशहन्त्रे ५७०

परमाणवे

प्रपञ्चकृते

पातङ्गिने

पुरुषाकाराय

परशंभुसमुद्भवाय

प्रसन्नास्सर्वसुखदाय

प्रपञ्चोद्भवसंभवाय
प्रसन्नाय
परमोदाराय
पराहङ्कारभञ्जनाय ५८०
पराय
परमकारुण्याय
परब्रह्ममयाय
प्रपन्नभयहारिणे
प्रपन्नार्तिहराय

ओं प्रसादकृते नमः
प्रपञ्चाय
पराशक्तिसमुद्भवाय
प्रदानपावनाय
प्रशान्तात्मने ५९०
प्रभाकराय
प्रपञ्चात्मने
प्रपञ्चोपशमनाय
पृथिवीपतये

परशुरामसमाराध्याय नमः
परशुरामवरप्रदाय
परशुरामचिरञ्जीवित्वप्रदाय
परमपावनाय
परमहंसस्वरूपाय
परमहंससुपूजिताय ६००
पञ्चनक्षत्राधिपाय
पञ्चनक्षत्रसेविताय
प्रपञ्चरक्षित्रे
प्रपञ्चस्थभयङ्कराय

फलदानप्रियाय
फलहस्ताय
फलप्रदाय
फलाभिषेकप्रियाय
फल्गुनस्य वरप्रदाय
फुटच्छमितपापौघाय ६१०
फल्गुनेनप्रपूजिताय
फणिराजप्रियाय
फुल्लांबुजविलोचनाय
बलप्रियाय

ओँ बलिने
बभ्रुवे
ब्रह्मविष्णवीशक्लेशकृते
ब्रह्मविष्णवीशरूपाय
ब्रह्मशक्रादिदुर्लभाय
बाह्यदृष्ट्याप्रमेयाङ्गाय ६२०
बिभ्रत्कवचकुण्डलाय
बहुश्रुताय
बहुमतये

ओँ ब्रह्मण्याय नमः
ब्राह्मणप्रियाय
बयप्रमथनाय
ब्रह्मणे
बहुरूपाय
बहुप्रदाय
बालार्कद्युतिमते ६३०
बालाय
बृहद्वक्षसे

बृहत्तनवे
ब्रह्माण्डभेदकृते
भक्तसर्वार्थसाधकाय
भव्याय
भोक्त्रे
भीतिकृते
भक्तानुग्रहकारकाय
भीषणाय ६४०
भैक्षकारिणे
भूसुरादिसुपूजिताय

भोगभाग्यप्रदाय
भस्मीकृतजगत्त्रयाय
भयानकाय
भानुसूनवे
भूतिभूषितविग्रहाय
भास्वद्रताय
भक्तिमतांसुलभाय
भ्रुकुटीमुखाय ६५०.
भवभूतगणैस्स्तुताय
भूतसंघसमावृताय

ओं भ्राजिष्णवे नमः
भगवते
भीमाय
भक्ताभीष्टवरप्रदाय
भवभक्तैकचित्ताय
भक्तिगीतस्तवोन्मुखाय
भूतसन्तोषकारिणे
भक्तानाञ्चित्तशोधनाय ६६०
भक्तिगम्याय

ओं भयहराय नमः
भावज्ञाय
भक्तसुप्रियाय
भूतिदाय
भूतिकृते
भोज्याय
भूतात्मने
भुवनेश्वराय
मन्दाय ६७०

मन्दगतये
मासमेवप्रपूजिताय
मुचुकुन्दसमाराध्याय
मुचुकुन्दवरप्रदाय
मुचुकुन्दार्चितपदाय
महारूपाय
महायशसे
महाभोगिने
महायोगिने
महाकायाय ६८०

महाप्रभवे
महेशाय
महदैश्वर्याय
मन्दारकुसुमप्रियाय
महाक्रतवे
महामानिने
महाधीराय
महाजयाय
महावीराय
महाशान्ताय ६९०

ओं मण्डलस्थाय नमः
महाद्युतये
महानुताय
महोदाराय
महानीयाय
महोदयाय
मैथिलीवरदायिने
मार्ताण्डस्यद्वितीयजाय
मैथिलीप्रार्थनाक्लृप्तदशकण्ठ-
शिरोपहृते
मरामरहराराध्याय ७००
महेन्द्रादिसुरार्चिताय
महारथाय
महावेगाय
मणिरत्नविभूषिताय
मेषनीचाय
महाघोराय
महासौरये

मनुप्रियाय
महार्घाय
महाग्रासाय ७१०
महदैश्वर्यदायकाय
महाशुष्काय
महारौद्राय
मुक्तिमार्गप्रदर्शकाय
मकरकुम्भाधिपाय
मृकण्डुतनयार्चिताय
मन्त्राधिष्ठानरूपाय

मल्लिकाकुसुमप्रियाय
महामन्त्रस्वरूपाय
महायन्त्रस्थिताय ७२०
महाप्रकाशदिव्यात्मने
महादेवप्रियाय
महाबलिसमाराध्याय
महर्षिगणपूजिताय
मन्दचारिणे
महामायिने
माषदानप्रियाय

ओं माषोदनप्रीतचित्ताय नमः
महाशक्त्ये
महागुणाय ७३०
यशस्कराय
योगदात्रे
यज्ञाङ्गाय
युगन्धराय
योगिने
योग्याय

ओं याम्याय नमः
योगरूपिणे
युगाधिपाय
यज्ञभृते ७४०
यजमानाय
योगाय
योगविदांवराय
यक्षराक्षसवेताळकूश्माण्डा -
दिप्रपूजिताय

यमप्रत्याधिदेवाय
युगपद्भोगदायकाय
योगप्रियाय
योगयुक्ताय
यज्ञरूपाय
युगान्तकृते ७५०
रघुवंशसमाराध्याय
रौद्राय
रौद्राकृतये
रघुनन्दनसल्लापाय
रघुप्रोक्तजपप्रियाय
रौद्ररूपिणे
रथारूढाय
राघवेष्टवरप्रदाय
रथिने
रौद्राधिकारिणे ७६०
राघवेणसमर्चिताय
रोषात्सर्वस्वहारिणे
राघवेणसुपूजिताय
राशिद्वयाधिपाय

ओं रघुभिः परिपूजिताय नमः
राज्यभूपाकराय
राजराजेन्द्रवन्दिताय
रत्नकेयूरभूषाढ्याय
रमानन्दनवन्दिताय
रघुपौरुषसन्तुष्टाय ७७०
रघुवंशनृपैः पूज्याय
रणन्मञ्जीरनूपुराय
रविनन्दनाय

ओं राजेन्द्राय नमः
रघुवंशप्रियाय
लोहजप्रतिमादानप्रियाय
लावण्यविग्रहाय
लोकचूडामणये
लक्ष्मीवाणीस्तुतिप्रियाय
लोकरक्षाय ७८०
लोकशिक्षाय
लोकलोचनरञ्जिताय

लोकाध्यक्षाय

लोकवन्द्याय

लक्ष्मणाग्रजपूजिताय

वेदवेद्याय

वज्रदेहाय

वज्राङ्कुशधराय

विश्ववन्द्याय

विरूपाक्षाय ७९०

विमलङ्गावराजिताय

विश्वस्थाय

वायसारूढाय

विशेषसुखकारकाय

विश्वरूपिणे

विश्वगोप्त्रे

विभावसुसुताय

विप्रप्रियाय

विप्ररूपाय

विप्राराधनतत्पराय ८००

विशालनेत्राय

विशिखाय

ओं विप्रदानबहुप्रियाय नमः
विश्वसृष्टिसमुद्भूताय
वैश्वानरसमद्युतये
विष्णवे
विरिञ्चये
विश्वेशाय
विश्वकर्त्रे
विशांपतये ८१०
विराडाधारचक्रस्थाय

ओं विश्वभुजे नमः
विश्वभावाय
विश्वव्यापारहेतवे
वक्रक्रूरविवर्जिताय
विश्वोद्भवाय
विश्वकर्मणे
विश्वसृष्टिविधायकाय
विश्वमूलनिवासिने
विश्वयन्त्रविधायकाय ८२०

विश्वाधारविलासिने
व्यासेनकृतपूजिताय
विभीषणेष्टवरदाय
वाञ्छितार्थप्रदायकाय
विभीषणसमाराध्याय
विशेषसुखदायकाय
विषमव्ययाष्टजन्मस्थोमकाद -
शफलप्रदाय
वासवात्मजसुप्रीताय
वसुदाय

वासवार्चिताय ८३०
विश्वत्राणैकनिरताय
वाङ्मनोतीतविग्रहाय
विराण्मन्दिरमूलस्थाय
वलीमुखसुखप्रदाय
विपाशाय
विगतातङ्काय
विकल्पपरिवर्जिताय
वरिष्ठाय
वरदाय

ॐ वन्द्याय नमः ८४०
विचित्राङ्गाय
विरोचनाय
शुष्कोदराय
शुक्लवपुषे
शान्तरूपिणे
शनैश्चराय
शूलिने
शरण्याय

ॐ शान्ताय नमः
शिवायामप्रियङ्कराय ८५०
शिवभक्तिमतांश्रेष्ठाय
शूलपाणये
शुचिप्रियाय
श्रुतिस्मृतिपुराणज्ञाय
श्रुतिजालप्रबोधकाय
श्रुतिपारगसम्पूज्याय
श्रुतिश्रवणलोलुपाय

श्रुत्यन्तर्गनमर्मज्ञाय
श्रुत्येष्टवरदायकाय
श्रुतिरूपाय ८६०
श्रुतिप्रीताय
श्रुतीप्सितफलप्रदाय
श्रुचिश्रुताय
शान्तमूर्तये
श्रुतिश्रवणकीर्तनाय
शमीमूलनिवासिने
शमीकृतफलप्रदाय

शमीकृतमहाघोषाय
शरणागतवत्सलाय
शमीतरुस्वरूपाय ८७०
शिवमन्त्रज्ञमुक्तिदाय
शिवागमैकनिलयाय
शिवमन्त्रजपप्रियाय
शमीपत्रप्रियाय
शमीपर्णसमर्चिताय
शतोपनिषदस्तुत्याय
शान्त्यादिगुणभूषिताय

ॐ शान्त्यादिषड्गुणोपेताय नमः
शङ्खवाद्यप्रियाय
श्यामरक्तसितज्योतिषे ८८०
शुद्धपञ्चाक्षरप्रियाय
श्रीहालास्यक्षेत्रवासिने
श्रीमते
शक्तिधराय
षोडशद्वयसंपूर्णलक्षणाय
षण्मुखप्रियाय

ॐ षड्गुणैश्वर्यसंयुक्ताय नमः
षडङ्गावरणोज्ज्वलाय
षडक्षरस्वरूपाय
षट्चक्रोपरिसंस्थिताय ८९०
षोडशिने
षोडशान्ताय
षट्शक्तिव्यक्तमूर्तिमते
षड्भावरहिताय
षडङ्गश्रुतिपारगाय

षट्कोणमध्यनिलयाय
षट्छास्त्रस्मृतिपारगाय
स्वर्णेन्द्रनीलमकुटाय
सर्वाभीष्टप्रदायकाय
सर्वात्मने १००
सर्वदोषघ्नाय
सर्वगर्वप्रभञ्जनाय
समस्तलोकाभयदाय
सर्वदोषाङ्गनाशकाय
समस्तभक्तसुखदाय

सर्वदोषनिवर्तकाय
सर्वनाशक्षमाय
सौम्याय
सर्वक्लेशनिवारकाय
सर्वात्मने ११०
सर्वदातुष्टाय
सर्वपीडानिवारकाय
सर्वरूपिणे
सर्वकर्मणे
सर्वज्ञाय

ओं सत्रंकारकाय नमः

सुकृते

सुलभाय

सर्वाभीष्टफलप्रदाय

सूर्यात्मजाय १२०

सदातुष्टाय

सूर्यवंशप्रदीपनाय

सप्तद्वीपाधिपाय

सुरासुरभयङ्कराय

ओं सर्वसंक्षोभहारिणे नमः

सर्वलोकहितङ्कराय

सर्वोदार्यस्वभावाय

सन्तोषात्सकलेष्टदाय

समस्तऋषिभिःस्तुत्याय

समस्तगणपावृताय १३०

समस्तगणसंसेव्याय

सर्वारिष्टविनाशनाय

सर्वसौख्यप्रदात्रे

सर्वव्याकुलनाशनाय
सर्वसंक्षोभहारिणे
सर्वारिष्टफलप्रदाय
सर्वव्याधिप्रशमनाय
सर्वमृत्युनिवारकाय
सर्वानुकूलकारिणे
सौन्दर्यमृदुभाषिताय १४०
सौराष्ट्रदेशोद्भवाय
स्वक्षेत्रेष्टवरप्रदाय
सोमयाजिसमाराध्याय

सीताभीष्टवरप्रदाय
सुखासनोपविष्टाय
सद्यःपीडानिवारकाय
सौदामिनीसन्निभाय
सर्वानुलङ्घ्यशासनाय
सूर्यमण्डलसञ्चारिणे
संहारास्त्रनियोजिताय १५०
सर्वलोकक्षयकराय
सर्वारिष्टविघायकाय
सर्वव्याकुलकारिणे

ओं सहस्रजपसुप्रियाय नमः
सुखासनोपविष्टाय
संहारास्त्रप्रदर्शिताय
सर्वालङ्कारसंयुक्त
कृष्णगोदानसुप्रियाय
सुप्रसन्नाय
सुरश्रेष्ठाय
सुघोषाय ९६०
सुखदाय

ओं सुहृदे नमः
सिद्धार्थाय
सिद्धसङ्कल्पाय
सर्वज्ञाय
सर्वदाय
सुखिने
सुग्रीवाय
सुधृतये
साराय ९७०

सुकुमाराय
सुलोचनाय
सुव्यक्ताय
सच्चिदानन्दाय
सुवीराय
सुजनाश्रयाय
हरिश्चन्द्रसमाराध्याय
हेयोपादेयवर्जिताय
हरिश्चन्द्रेष्टवरदाय
हंसमन्त्रादिसंस्तुताय ९८०

हंसवाहसमाराध्याय
हंसवाहवरप्रदाय
हृद्याय
हृष्टाय
हरिसखाय
हंसाय
हंसगतये
हविषे
हिरण्यवर्णाय
हितकृते ९९०

ओं हर्षदाय नमः

हेमभूषणाय

हविर्होत्रे

हंसगतये

हंसमन्त्रादिसंस्तुताय

हनूमदर्चितपदाय

हलधृत्पूजिताय

क्षेमदाय

ओं क्षेमकृते नमः

क्षेम्याय १०००

क्षेत्रज्ञाय

क्षामवर्जताय

क्षुद्रघ्नाय

क्षान्तिदाय

क्षेमाय

क्षितिभूषाय	क्षमाधराय	
क्षमाश्रयाय	क्षयद्धाराय	१००९

शनैश्चरसहस्रनामावळिः संपूर्णा ॥

॥ श्रीरस्तु ॥

॥ शन्यष्टोत्तरशतनामस्तोत्रम् ॥

शनैश्चराय शान्ताय सर्वाभीष्टप्रदायिने ।
शरण्याय वरेण्याय सर्वेशाय नमो नमः ॥ १

सौम्याय सुरवन्द्याय सुरलोकविहारिणे ।

ओं हर्षदाय नमः
हेमभूषणाय
हविर्होत्रे
हंसगतये
हंसमन्त्रादिसंस्तुताय
हनूमदर्चितपदाय
हलधृत्पूजिताय
क्षेमदाय

ओं क्षेमकृते नमः
क्षेमन्याय १०००
क्षेत्रज्ञाय
क्षामवर्जिताय
क्षुद्रघ्नाय
क्षान्तिदाय
क्षेमाय

क्षितिभूषाय	क्षमाधराय
क्षमाश्रयाय	क्षयद्वाराय १००९

शनैश्चरसहस्त्रनामावळिः संपूर्णा ॥

॥ श्रीरस्तु ॥

॥ शन्यष्टोत्तरशतनामस्तोत्रम् ॥

शनैश्चराय शान्ताय सर्वाभीष्टप्रदायिने ।
शरण्याय वरेण्याय सर्वेशाय नमो नमः ॥ १

सौम्याय सुरवन्द्याय सुरलोकविहारिणे ।

सुखासनोपविष्टाय सुन्दराय नमो नमः ॥ २
घनाय घनरूपाय घनाभरणधारिणे ।
घनसारविलेपाय खद्योताय नमो नमः ॥ ३
मन्दाय मन्दचेष्टाय महनीय गुणात्मने ।
मर्त्यपावनपादाय महेशाय नमो नमः ॥ ४
छायापुत्राय शर्वाय शततूणीरधारिणे ।
चरस्थिर स्वभावाय चञ्चलाय नमो नमः ॥ ५
नीलवर्णाय नित्याय नीलाञ्जननिभाय च ।

नीलाम्बरविभूषाय निश्चलाय नमो नमः ॥ ६

वेद्याय विधिरूपाय विरोधाधारभूमये ।
वेदास्पदस्वभावाय वज्रदेहाय ते नमः ॥ ७
वैराग्यदाय वीराय वीतरोगभयाय च ।
विपत्परम्परेशाय विश्ववन्द्याय ते नमः ॥ ८
गृध्रवाहाय गूढाय कूर्माङ्गाय कुरूपिणे ।
कुत्सिताय गुणाढ्याय गोचराय नमो नमः ॥ ९
अविद्यामूलनाशाय विद्याविद्यास्वरूपिणे ।
आयुष्यकारणायापदुद्धर्त्रे च नमो नमः ॥ १०
विष्णुभक्ताय वशिने विविधागमवेदिने ।
विधिस्तुत्याय वन्द्याय विरूपाक्षाय ते नमः ॥ ११

वरिष्ठाय गरिष्ठाय वज्राङ्कुशधराय च ।
वरदाभयहस्ताय वामनाय नमो नमः ॥ १२
ज्येष्ठापत्नीसमेताय श्रेष्ठाय मितभाषिणे ।
अष्टौघनाशकार्याय पुष्टिदाय नमो नमः ॥ १३
स्तुत्याय स्तोत्रगम्याय भक्तिवश्याय भानवे ।
भानुपुत्राय भव्याय पावनाय नमो नमः ॥ १४
धनुर्मण्डलसंस्थाय धनदाय धनुष्मते ।
तनुप्रकाशदेहाय तामसाय नमो नमः ॥ १५
अशेषजनवन्द्याय विशेषफलदायिने ।

वशिकृतजनेशाय पशूनां पतये नमः ॥ १६
खेचराय खगेशाय घननीलाम्बराय च ।
काठिन्यमानसायार्यं गणस्तुत्याय ते नमः ॥ १७
नीलछत्राय नित्याय निर्गुणाय गुणात्मने ।
निरामयाय निन्द्याय वन्दनीयाय ते नमः ॥ १८
धीराय दिव्यदेहाय दीनार्तिहरणाय च ।
दैन्यनाशकरायार्यजनगण्याय ते नमः ॥ १९
क्रूराय क्रूरचेष्टाय कामक्रोधकराय च ।
कळत्र पुत्र शत्रुत्वकारणाय नमो नमः ॥ २०
परिपोषित भक्ताय परभीतिहराय च ।

भक्तसंघमनोभीष्ट फलदाय नमो नमः ॥ २१

इत्थं शनैश्चरस्येदं नाम्नामष्टोत्तरं शतम् ।
प्रत्यहं प्रजपन्मर्त्यो दीर्घमायुरवाप्नुयात् ॥ २२

शन्यष्टोत्तरशतनामस्तोत्रं संपूर्णम् ॥

॥ श्रीरस्तु ॥

॥ शन्यष्टोत्तरशतनामावळिः ॥

ओं शनैश्चराय नमः
शान्ताय
सर्वाभीष्टप्रदायिने
शरण्याय
वरेण्याय
सर्वेशाय
सौम्याय
सुरवन्द्याय

ओं सुरलोकविहारिणे नमः
सुखासनोपविष्टाय १०
सुन्दराय
घनाय
घनरूपाय
घनाभरणधारिणे
घनसारविलेपनाय
खद्योताय

ओं मन्दाय नमः
मन्दचेष्टाय
महनीयगुणात्मने
मर्त्यपावनपादाय २०
महेशाय
छायापुत्राय
शर्वाय
शरतूणीरधारिणे
चरस्थिरस्वभावाय
चञ्चलाय

ओं नीलवर्णाय नमः
नित्याय
नीलाञ्जननिभाय
नीलाम्बरविभूषाय ३०
निश्चलाय
विधिरूपाय
वेद्याय
विरोधाधारभूमये
वेदास्पदस्वभावाय
वज्रदेहाय

वैराग्यदाय
वीराय
वीतरोगभयाय
विपत्परंपरेशाय ४०
विश्ववन्द्याय
गृध्रवाहनाय
गूढाय
कूर्माङ्गाय
कुरूपिणे
कुत्सिताय
गुणाढ्याय

गोचराय
अविद्यामूलनाशनाय
विद्याऽविद्यास्वरूपिणे ५०
आयुष्यकारणाय
आपदुद्धर्त्रे
विष्णुभक्ताय
वशिने
विविधागमवेदिने
विधिस्तुत्याय
वन्द्याय
विरूपाक्षाय

ओं वरिष्ठाय नमः
गरिष्ठाय ६०
वज्राङ्कुशधराय
वरदाय
अभयहस्ताय
वामनाय
ज्येष्ठापत्नीसमेताय
श्रेष्ठाय
मितभाषिणे

ओं अष्टौघनाशना यनमः
आर्यपुष्टिदाय
स्तुत्याय ७०
स्तोत्रगम्याय
भक्तिवश्याय
भानवे
भानुपुत्राय
भव्याय
पावनाय
धनुर्मण्डलसंस्थाय

धनदाय
धनुष्मते
तनुप्रकाशदेहाय ८०
तामसाय
अशेषजनवन्द्याय
विशेषफलदायिने
वशीकृतजनेशाय
पशूनांपतये
खेचराय
घननीलाम्बराय
काठिन्यमानसाय

आर्यगणस्तुत्याय
नीलच्छत्राय ९०
नित्याय
निर्गुणाय
गुणात्मने
निरामयाय
निन्द्याय
वन्दनीयाय
धीराय
दिव्यदेहाय
दीनार्तिहरणाय

ओं दैन्यनाशनाय नमः १००

आर्यजनगण्याय

क्रूराय

क्रूरचेष्टाय

कामक्रोधकराय

ओं कळत्रपुत्रशत्रुत्वकारणाय नमः

परिपोषितभक्ताय

परभीतिहराय

भक्तसङ्घमनोभीष्टफलदाय नमः १०८

अनया पूजया भगवान् सर्वदेवात्मकस्सुप्रीतस्सुप्रसन्नो भवतु

शन्यष्टोत्तरशतनामावलिः सम्पूर्णा ॥

अन्य प्राप्तिस्थान–

चौखम्बा सुरभारती प्रकाशन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)

के० ३७/११७, गोपाल मन्दिर लेन

पो० बा० नं० ११२९, वाराणसी २२१००१



चौखम्बा विद्याभवन

चौक (बनारस स्टेट बैंक भवन के पीछे)

पो० बा० नं० १०६९, वाराणसी २२१००१